# navagrahapIDAharastotram 2

# નવગ્રહપીડાહરસ્તોત્રમ્ ૨

## Document Information

Text title : navagrahapIDAharastotram 2

File name : navagrahapIDAharastotram2.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Latest update : October 20, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 21, 2022

*sanskritdocuments.org*

# નવગ્રહપીડાહરસ્તોત્રમ્ ૨

સિન્દૂરારુણ રક્તાઙ્ગઃ કર્ણાન્તાયત લોચનઃ ।
સહસ્રકિરણઃ શ્રીમાન્ સપ્તાશ્વકૃતવાહનઃ ॥ ૧॥

ગભસ્તિમાલી ભગવાન્શિવપૂજાપરાયણઃ ।
કરોતુ મે મહાશાન્તિં ગ્રહપીડાં વ્યપોહતુ ॥ ૨॥

જગદાપ્યાયનકરો હ્યમૃતાધારશીતલઃ ।
સોમઃ સૌમ્યેન ભાવેન ગ્રહપીડાં વ્યપોહતુ ॥ ૩॥

પદ્મરાગનિભા નેના દેહેનાપિઙ્ગલલોચનઃ ।
( var  પદ્મરાગનિભાઙ્ગેન કરિપિઙ્ગલલોચનઃ)
અઙ્ગારકઃ  શિવેભક્તો રુદ્રાર્ચન પરાયણઃ ॥ ૪॥

રુદ્રસદ્ભાવસમ્પન્નો રુદ્રધ્યાનૈકમનસઃ
ગ્રહપીડા ભયં સર્વં વિનાશયતુ મે સદા ॥ ૫॥

કુંકુમચ્છવિદેહેન ચારુદ્યુત્કરતઃ સદા ।
શિવભક્તો બુધઃ શ્રીમાન્ ગ્રહપીડાં વ્યપોહતુ ॥ ૬॥

ધાતુ ચામીકરચ્છાયઃ સર્વજ્ઞાનકૃતાલયઃ ।
( var  તપ્ત ચામીકરચ્છાયઃ)
બૃહસ્પતિઃ સદાકાલમીશાનાર્ચનતત્પરઃ ॥ ૭॥

સોઽપિ મે શાન્તચિત્તેન પરમેણ સમાહિતઃ ।
ગ્રહપીડાં વિનિર્જિત્ય કરોતુ વિજયં સદા ॥ ૮॥

હિમકુન્દેન્દુતુલ્યાભઃ સુરદૈત્યેન્દ્રપૂજિતઃ ।
શુક્રઃ શિવાર્ચનરતો ગ્રહપીડાં વ્યપોહતુ ॥ ૯॥

ભિન્નાઞ્જનચયચ્છાયઃ સરક્તનયનદ્યુતિઃ ।
શનૈશ્ચરઃ શિવેભક્તો ગ્રહપીડાં વ્યપોહતુ ॥ ૧૦॥

નીલાઞ્જનનિભઃ શ્રીમાન્ સૈહિકેયો મહાબલઃ ।
શિવપૂજાપરો રાહુગ્રહપીડા વ્યપોહતુ ॥ ૧૧॥

ધૂમ્રાકારો ગ્રહઃ કેતુરૈશાન્યાં દિશિ સંસ્થિતઃ ।
વર્તુલોઽતીવ વિસ્તીર્ણલોચનૈશ્ચ વિભીષણઃ ॥ ૧૨॥

પલાશધૂમ્રસઙ્કાશો ગ્રહપીડાઽપકારકઃ ।
ઘોરદંષ્ટ્રાકરાલશ્ચ કરોતુ વિજયં મમ ॥ ૧૩॥

ખડ્ગખેટકહસ્તશ્ચ વરેણ્યો વરદઃ શુભઃ ।
શિવભક્તશ્ચાઽગ્રજન્મા ગ્રહપીડાં વ્યપોહતુ ॥ ૧૪॥

એતે ગ્રહા મહાત્માનો મહેશાર્ચનભાવિતાઃ ।
શાન્તિં કુર્વન્તુ મે હૃષ્ટાઃ સદાકાલં હિતૈષિણઃ ॥ ૧૫॥

॥ ઇતિ નવગ્રહપીડાહરસ્તોત્રં (૨) સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*navagrahapIDAharastotram 2*

pdf was typeset on October 21, 2022

Please send corrections to *sanskrit@cheerful.com*